## दिनाङ्क :- 12.09.2025

## प्रात: - 06:55

**प्रधानमन्त्री ज्ञानभारतम्**

प्रधानमन्त्री श्रीनरेन्द्र-मोदी अद्य सायंकाले नवदिल्लीनगरे ज्ञानभारतमित्यस्मिन् विषये अन्ताराष्ट्रियसम्मेलने भागं गृहीष्यति। सः पाण्डुलिप्याः अङ्कीकरणं, संरक्षणं, जनपरिवेषणं च त्वरितरूपेण कर्तुं समर्पितं ज्ञानभारतम् पोर्टल् इति डिजिटलमञ्चं अपि प्रारभते, अथ अस्मिन् अवसरे सभां च सम्बोधयिष्यति। अवधेयम्, यत् "पाण्डुलिपिपरम्परायाः माध्यमेन भारतस्य ज्ञानपरम्परायाः पुनः प्राप्तिः" इत्यस्मिन् विषये ह्यः एव त्रिदिवसीयसम्मेलनस्य आरम्भः अभवत् । सम्मेलनमाध्यमेन, भारतस्य अप्रतिमपाण्डुलिपिसम्पदः पुनः सम्पुष्टीकरणस्य मार्गेषु विचारं कर्तुं, वैश्विकज्ञानसंवादस्य हृदये स्थापयितुं च, प्रमुखविद्वांसः, संरक्षणविदः, प्रौद्योगिकीविदः, नीतिविशेषज्ञाः च एकत्र आगताः सन्ति।

**प्रधानमन्त्री -उत्तराखण्ड**

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना उत्तराखण्डस्य कृते द्वादशशत-कोटिरूप्यकाणां वित्तीय सहायतायाः घोषणा कृता । ह्यः देहरादूननगरे उच्चस्तरीयसभायाः अध्यक्षतां कृत्वा श्रीमोदी राज्यस्य आपदाप्रभावितक्षेत्रेषु परिहार-पुनर्वास-प्रयासानां समीक्षां कृतवान्। मृतानां परिवाराणां कृते द्वि-लक्षरूप्यकाणां अनुग्रहराशिः, गभीररूपेण आहतानाम् कृते पञ्चाशत्-सहस्ररूप्यकाणां च अनुग्रहराशिः अपि घोषितः। प्रधानमन्त्रिणा आपदाप्रभावितप्रदेशानाम्, अथ तत्रस्थ-जनानां च साहाय्यार्थं बहु-आयामीय-पद्धतेः आवश्यकतायाः उपरि बलं दत्तम् ।

**प्रधानमन्त्री-वारणासी::**

प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना मॉरीशस-देशस्य कृते, तद्देशस्य आधारभूतसंरचनानां सुदृढीकरणाय, उद्योग-अवसराणां सर्जनाय, स्वास्थ्य-सेवा-सुविधानां वर्धनाय च उद्देशितस्य विशेष आर्थिक-राशेः उद्घोषणा कृता । अवधेयम्, यत् उत्तरप्रदेशस्य वाराणसी-नगरे मॉरीशसदेशस्य समकक्षेन नवीनचन्द्ररामगुलाम इत्यनेन सह व्यापकद्विपक्षीयवार्तां कृत्वा संयुक्तपत्रकारसमारोहे एतत् उक्तवान् । श्रीमोदी उक्तवान्, यत् एषः उपक्रमः सहायता-रूपेण नास्ति, अपितु अवयोः सहभागि-भविष्यस्य निवेशः वर्तते ।

**बाइट-प्रधानमंत्री मोदी पैकेज- से**

द्वयोः नायकयोः वार्तायाः अनन्तरं भारतेन मॉरीशसेन च विज्ञानं प्रौद्योगिकी, समुद्रविज्ञानं, प्रशासनिक-प्रशिक्षणं, दूरमापनं च इत्येतेषु क्षेत्रेषु चत्वारि सन्धिपत्राणि हस्ताक्षरितानि ।

**भारतीय नौसेना**

भारतीय-समुद्रि-सुरक्षायाः वर्धनाय, महत्त्वपूर्ण-सोपानरूपेण, भारतीय नौसेना अद्य गुरुग्रामे INS अरावली इत्यस्य आरम्भं करिष्यति । रक्षामन्त्रालयेन एकस्मिन् वक्तव्ये उक्तम्, यत् नौसेनायाः सूचनासञ्चार-संरचनानां सुदृढीकरणाय, अरावलीपर्वतशृङ्खलायाः नामधेयेन, INS अरावली इति निर्मितम् अस्ति । नौसेना प्रमुखः एडमिरल दिनेश के त्रिपाठी समारोहस्य अध्यक्षतां करिष्यति।

**जोशी ग्रीन ::**

केन्द्रीय नवीन तथा नवीकरणीय ऊर्जा मन्त्रिणा, श्रीप्रल्हाद-जोशिना ह्यः नवदिल्लीनगरे नवीन-नवीकरणीय-ऊर्जा-मन्त्रालयेन आयोजितस्य प्रथम-वार्षिकस्य हरित-हाइड्रोजन-अनुसन्धान-विकास-सम्मेलनस्य उद्घाटनं कृतम् । अस्मिन् अवसरे जोशीमहोदयेन हाइड्रोजन-नवीकरणे स्टार्टअप-संस्थानां समर्थनार्थं एकशत-कोटिरूप्यकाणां नूतनं काल्-फार्-प्रोपोसल्स् (Call for Proposals) इति प्रस्तावः प्रारब्धः । इयं योजना अभिनव-हाइड्रोजन-उत्पादन-भण्डारण-परिवहन-उपयोग-प्रौद्योगिकीषु प्रायोगिक-परियोजनानां कृते प्रति-परियोजनाय पञ्च-कोटि-रूप्यकाणि यावत् प्रदास्यति । सम्मेलने पञ्चविंशतिः स्टार्टअप-संस्थाः स्वस्य नवीनतानां प्रदर्शनं कुर्वन्ति, यत्र विद्युत्-विपाक-निर्माणात् आरभ्य AI-सञ्चालित-अनुकूलनं जैविक-हाइड्रोजन-समाधानं च सम्मिलितम् भवति ।

**छत्तीसगढ़-माओवादिनः::**

छत्तीसगढे ह्यः सुरक्षाबलैः दश माओवादिनः मारिताः । हतेषु मनोजः वा भास्करः नाम माओवादी नायकः, यः शिरसि प्रायः एककोटिरूप्यकाणां पुरस्कारं वहति । क्षेत्रे माओवादीनां विशाल-समूहस्य उपस्थितेः विषये गुप्तचरसूचनायाः आधारेण कार्यं कुर्वन् गरियाबन्द् ई-त्रिंशत्-एककस्य, विशेषकार्यदलस्य (STF), कोब्रा-बटालियनस्य च कर्मचारिभिः संयुक्तं अभियानं प्रारब्धम् आसीत् । सुरक्षाबलेन पुष्टिः कृता, यत् अस्मिन् अभियाने दश माओवादिनः निष्प्रभावीकृताः।

**मौसम**

भारतस्य ऋतुविज्ञान-विभागेन आगामिषु चतुःपञ्च-दिवसेषु प्रायद्वीपीयभारतस्य उपरि अत्यधिकवृष्टेः पूर्वानुमानं कृतम् अस्ति । विभागेन, अद्य नागालैण्ड्, मणिपुर, मिजोरम, त्रिपुरा इत्यादिषु, पूर्वोत्तरभारतस्य केषुचित् भागेषु अपि अत्यधिकवृष्टितः अत्यन्तं प्रचण्ड-वर्षायाः अपि पूर्वानुमानं कृतमस्ति ।